# षष्ठपत्रम्

## वेदः

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. सर्वे प्रश्नाः समाधेयाः।

(20×2=40)

1. "रुद्राष्टाध्यायी" इति ग्रन्थे कस्य देवस्य स्तुतिः विद्यते?
2. पिङ्गलछन्दस्सूत्रे कति छन्दांसि प्रामुख्येन सन्ति?
3. कति वेदाः सन्ति?
4. ऋग्वेदस्य उपवेदः कः?

अथवा

उद्गाता कस्य वेदस्य ऋत्विक् अस्ति?

5. वेदस्य का परिभाषा?
6. वेदानां विभजनं केन कृतम्?

अथवा

याज्ञवल्क्यस्य गुरोः नाम किम्?

7. अथर्ववेदस्य मुख्यः विषयः कः?
8. अनुदात्तस्वरस्य स्थानं कुत्र भवति?

अथवा

स्वरितस्वरस्य चिह्नं किं भवति?

9. शिवसंकल्पसूक्तेऽस्मिन् कति मंत्राः सन्ति?

10. पुरुषसूक्तस्य प्रथमः मन्त्रः कः?

11. वेदाङ्गेषु छन्दसः गणना कुत्र भवति?

अथवा

पिङ्गलाचार्यस्य ग्रन्थः कः?

12. रुद्राष्टाध्यायीग्रन्थस्य प्रथमः मन्त्रः कः?

अथवा

वेदस्य अङ्गानि कानि?

13. रुद्राष्टाध्यायीग्रन्थे प्रथमाध्याये प्रसिद्धं सूक्तं किम् अस्ति?

14. गुरुवर्णस्य संकेतं किम्?

15. आसुरीगायत्री-छन्दसि कति अक्षराणि सन्ति?

16. "प्राजापत्याष्टौ" इति पदस्य कोऽभिप्रायः?

17. जगती-छन्दसि एकस्मिन् पादे कति अक्षराणि भवन्ति?

18. रुद्राष्टाध्यायीग्रन्थे पुरुषसूक्तस्य अन्तिमः मन्त्रः कः?

19. रुद्राष्टाध्यायीग्रन्थस्य चतुर्थाध्यायस्य विषयः कः?

20. "नीलग्रीवाः" इति कस्य देवस्य विशेषणम्?

सर्वे प्रश्नाः समाधेयाः। (5×8=40)

21. यज्जाग्रतो. . . . . .शिवसङ्कल्पमस्तु॥ इति मन्त्रं सस्वरं पूरयतु।

अथवा

"बृहती" छन्दसः एकं उदाहरणं लिखत।

22. वेदाहमेतं. . . . . .विद्यतेऽयनाय॥ इति मन्त्रं सस्वरं पूरयतु।

अथवा

श्रीश्चते. . . . . .इषाण॥ इति मन्त्रं सस्वरं पूरयतु।

23. 'अनुष्टुप्' छन्दसः एकमुदाहरणं सनियमं स्पष्टयत।

अथवा

शिवसंकल्पसूक्तस्य मन्त्रद्वयं लिखत।

24. "उष्णिक्" छन्दसः लक्षणं लिखत।

25. विभ्राड्बृहत्पिबतु. . . . . .विराजति॥ इति मन्त्रं सस्वरं पूरयतु।

स. कश्चन एकः प्रश्नः समाधेयः। (1×20=20)

26. पुरुषसूक्तस्य सप्तमन्त्रान् सस्वरं लिखत।

अथवा

गायत्री एवं जगतीछन्दसां परिचयं सोदाहरणं व्याख्यात।

अथवा

# PS/UM-I/6/96/18

## षष्ठपत्रम्

## व्याकरणम्

समय: घण्टात्रयम् पूर्णाङ्का: 100

अ. अधोलिखितेषु सर्वे प्रश्ना: समाधेया:। (2×20=40)

1. हकारादिष्वकार: किमर्थ: ?
2. आदेश: क: ?
3. प्रत्याहारेषु केषां ग्रहणं न भवति ?
4. कस्य वर्णस्य उदात्तसंज्ञा भवति ?

अथवा

कस्य वर्णस्य दीर्घाभाव: अस्ति ?

5. आभ्यन्तरप्रयत्नस्य कति भेदा: सन्ति ?
6. कति उच्चारणस्थानानि सन्ति ?
7. किं नाम सत्त्वम् ?
8. ए-ऐ-वर्णयो: सवर्णसंज्ञा कथन्न ?
9. इक: इति षष्ठ्यन्तं पदं कुत्र उपतिष्ठते ?

10. तदन्तविधि: कुत्र न भवति ?

अथवा

प्रत्यय: क: भवति ?

11. कस्मिन्विधौ आदेश: स्थानिवत् भवति ?

12. "तत्परे च" इति वार्तिकस्य किम् उदाहरणम् ?

13. इन्द्र: इत्यत्र द्वित्वं केन सूत्रेण भवति ?

14. द्वित्वं लस्यैव. . . . .इति श्लोकं पूरयत।

अथवा

पुंख्यानम् इत्यत्र पुम: मकारस्य रुत्वं कथन्न ?

15. ऋणशब्दस्य कोऽर्थ: ?

16. ऋणार्णं किं भवति ?

17. "ई३चाक्रवर्मणस्य" इति सूत्रेण किं भवति ?

अथवा

सर्पिष्पाशम् इत्यत्र विसर्गस्य षादेश: केन सूत्रेण भवति ?

18. "है हे प्रयोगे है हयो:" इति सूत्रस्योदाहरणं लिखत।

19. "न पदान्ताट्टोरनाम्" इति सूत्रे "अनाम्" ग्रहणस्य किं फलम् ?

20. "यवलपरे यवला वेति वाच्यम्" इत्यस्य कोऽर्थ: ?

ब. अधोनिर्दिष्टाः सर्वे प्रश्नाः समाधेयाः। (5×8=40)

21. अन्योन्याश्रयदोषं तत्परिहारोपायं च लिखत।

22. सुद्ध्युपास्यः इति रूपं सविस्तरं सिद्धान्तकौमुदीदिशा वर्णयत।

अथवा

"अचः परस्मिन्पूर्वविधौ" इति सूत्रं सिद्धान्तकौमुदीदिशा विवृणुत।

23. "अचोऽन्त्यादि टि" इति सूत्रं स्वग्रन्थानुसारं व्याख्यात।

अथवा

"निपात एकाजनाङ्" "सम्बुद्धौ शाकल्यस्येतावनार्षे" "मञ उञो वो वा" एषु सूत्रद्वयं व्याख्यात।

24. "अत्रानुनासिकः पूर्वस्य तु वा" "अनुनासिकात्परोऽनुस्वारः" इति सूत्रद्वयं विवृणुत।

अथवा

यशस्कल्पम्, प्रातःकल्पम्, सर्पिष्पाशम्, नमस्करोति एषु प्रयोगत्रयं साधयत।

25. "भो भगो अघोऽपूर्वस्य योऽशि" "हलि सर्वेषाम्" इति सूत्रद्वयं सोदाहरणं विवृणुत।

स. एकः प्रश्नः समाधेयः। (1×20=20)

26. मुनित्रयं नमस्कृ. . . . .इति मङ्गलाचरणं विलिख्य व्याख्यां कुरुत।

अथवा

हर इह हरयिह कृष्णर्द्धिः कृष्णर्द्द्धिः कृष्णर्धिः इति रूपं साधयत।

अथवा

ऋछौ ऋचछा. . . . .इति श्लोकं विलिख्य सर्वाणि उदाहरणानि लिखत।

अथवा

# PS/UM-I/6/97/18

## षष्ठपत्रम्

## साहित्यम्

समयः घण्टात्रयम् | पूर्णाङ्काः 100

अ. सर्वे प्रश्नाः समाधेयाः। (20×2=40)

1. वृत्तरत्नाकरस्य प्रणेता कः?

2. छन्दःशास्त्रस्य रचयिता कः?

3. "शास्त्र" पदेन का संख्या बोध्यते?

4. "जभ्न" पदेनानेन किं लक्ष्यते?

अथवा

कतिविधं छन्दः?

5. यतेः लक्षणं लिखत।

6. पादलक्षणं किम्?

अथवा

पत्येकः कः?

7. "पिच्छिलानि च दधीनि" अत्र पिच्छिलानि शब्दस्य किं तात्पर्यम्?

8. समवृत्तस्य लक्षणं लिखत।

अथवा

"सर्वगुर्मो" अस्य अर्थं लिखत।

9. "वृत्तरत्नाकरे" अत्र कति अध्यायाः?

10. "चपला" कस्य भेदः?

अथवा

रगणस्वरूपं लिखत।

11. "देवभाषा" अत्र गणनिर्देशं कुरुत।

अथवा

पथ्यावक्त्रस्य लक्षणं लिखत।

12. "मौनं ध्यानं भूमौ शय्या" कस्येदमुदाहरणम्?

13. प्रमाणिकावृत्तस्य उदाहरणं लिखत।

14. द्रुतविलम्बितवृत्ते यतिः कुत्र भवति?

15. "भक्तिः" पदेनानेन का संख्या लक्ष्यते?

16. "अङ्घ्रयो यस्य चत्वारः" अत्र अङ्घ्रयः इति शब्दस्य अर्थो लेख्यः।

17. वृत्तरत्नाकरे कति पद्यानि?

18. आर्याछन्दसः गणना कस्मिन् वृत्ते भवति?

19. "अब्धिभूतरसादीनाम्" अस्य अभिप्रायः कः?

20. स्रग्धरावृत्तस्य जातिसंज्ञा का?

ब. सर्वे प्रश्नाः समाधेयाः। (5×8=40)

21. शिखरिणीछन्दसः लक्षणं विलिख्य उदाहरणे गणनिर्देशो विधेयः।

अथवा

"पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः।
पुरः स्थितेन तेन स्याल्लघुताऽपि क्वचिद् गुरोः" ॥
अस्य श्लोकस्य भावो लेख्यः।

22. गणस्वरूपं ग्रन्थोक्तदिशा निर्दिशत।

अथवा

"सदारात्मजज्ञानि" अमु श्लोकं प्रपूर्य गणनिर्देशपुरस्सरं लक्षणं लिखत।

23. पुष्पिताग्रावृत्तं लक्षणोदाहरणपुरस्सरं विमृशत।

अथवा

वृत्तरत्नाकरस्य मङ्गलाचरणं व्याख्येयम्।

24. अनुष्टुप्वृत्तस्य लक्षणोदाहरणं लिखत।

25. यस्य पादचतुष्केऽपि लक्ष्मभिन्नं परस्परम्।

तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः॥"

अस्य भावो लेख्यः।

(1×20=20)

स. कश्चनैकः प्रश्नः समाधेयः।

26. भट्टकेदारस्य जीवनपरिचयो लेख्यः।

अथवा

उपजातिवृत्तं विस्तरेण व्याख्यात।

अथवा

वृत्तरत्नाकरस्य वैशिष्ट्यं प्रतिपादयत।

अथवा

# PS/UM-I/6/98/18

## षष्ठपत्रम्

## ज्योतिषम्

समय: घण्टात्रयम् पूर्णाङ्का: 100

अ. सर्वे प्रश्ना: समाधेया:। (20×2=40)

1. इष्टकाल: क:?

2. किन्नाम भभोग:?

3. जन्मनक्षत्रस्य गतमानं किं स्यात्?

अथवा

"पलभा" इत्यस्य परिभाषा का?

4. दशवर्गाणां नामानि लिखत।

5. "ओजराशि:" इति पदेन किं गृह्यते?

6. चरकरणानां नामानि लिखत।

अथवा

स्थिरकरणानां नामानि लिखत।

7. कृष्णपक्षस्य अन्तिमतिथि: क:?

8. उपान्तिमनक्षत्रस्य नाम किम्?

9. 13° 20′ इति कस्य मानं भवति?

10. योगानां संख्या कति?

अथवा

आश्लेषानक्षत्रस्य क्रमसंख्या का?

11. परिमाणरहितं किं भवति बिन्दुः वा रेखा ?

12. रेखायाः परिभाषा का?

13. रेलमार्गः कस्याः रेखायाः लक्षणम्?

अथवा

सरलरेखायाः लक्षणं किम्?

14. समकोणत्रिभुजस्य लक्षणं किम्?

15. सीमायाः परिभाषा का?

16. 110° कोणः अधिककोणः न्यूनकोणः वा किम्?

अथवा

समकोणत्रिभुजस्य लक्षणं किम्?

17. "सीमा" इत्यस्य परिभाषा का?

18. त्रिज्या का?

19. किन्नाम अर्धवृतम्?

20. केन्द्रस्य लक्षणं किम्?

**अथवा**

बहुभुजक्षेत्रं चित्रयत?

ब. **सर्वे प्रश्नाः समाधेयाः।** (5×8=40)

21. चालनं कतिविधं? स्पष्टयत।

**अथवा**

चन्द्रस्पष्टसाधनं प्रतिपाद्यताम्।

22. द्रेष्काणसाधनं कुरुत।

23. विंशोत्तरीदशायाः भुक्तमानं कथं ज्ञायते?

**अथवा**

वृत्त-केन्द्र-परिधि-व्यासरेखेत्यादीनां परिभाषां लिखत।

24. सम-विषमायतौ सचित्रं साधयत।

25. इष्टरेखोपरि समभुजं त्रिभुजं वा कर्त्तव्यमिति प्रतिज्ञायाः संरचनां उपपत्तिं च लिखत।

**अथवा**

"अभीष्टकोणस्य तुल्यं खण्डद्वयं कर्त्तव्यमिति" प्रतिज्ञायाः उपपत्तिं लिखत।

द्वौ प्रश्नौ समाधेयौ। (2×10=20)

26. स्वकल्पितोदाहरणेन दशमलग्नसाधनं कुरुत।

अथवा

स्वकल्पितोदाहरणेन ससन्ध्य द्वादशभावानां साधनं कुरुत।

27. अभीष्टरेखायां तद् गताभीष्टचिह्नात् लम्बो विधेयः" इत्यस्य प्रतिज्ञायाः रचनां कृत्वा उपपत्तिं स्पष्टयत।

अथवा

"अभीष्टरेखायाः समानखण्डद्वयं कर्त्तव्यमिति" प्रतिज्ञां संरच्य उपपत्तिं प्रतिपादयत।

अथवा

# PS/UM-I/6/99/18

## षष्ठपत्रम्

## दर्शनम्

समय: घण्टात्रयम् पूर्णाङ्काः 10

अ. सर्वे प्रश्नाः अतिलघूत्तरेण समाधेयाः। (20×2=40

1. बालशब्दस्य कोऽर्थः ?
2. पदार्थसामान्यलक्षणं किम् ?
3. नैयायिकमते शक्तेः पदार्थान्तरत्वम् अस्ति न वा ?
4. सत्ता कुत्र विद्यते ?

अथवा

कस्मिन् द्रव्ये शब्दः समवायसम्बन्धेन तिष्ठति ?

5. परमपरं किम् ?
6. अतिव्याप्तेः लक्षणमुदाहरणञ्च लिखत।

अथवा

रसग्राहकं इन्द्रियं किम् ?

7. तेजसि कति गुणाः वर्त्तन्ते ?
8. वायवीयशरीरं कुत्र प्रसिद्धम् ?

अथवा

शरीरान्तरः सञ्चारीवायुः नाम किम्?

9. कानि भूतानि? तेषां नामानि लिखत।

10. अस्ताचलसंनिहिता नाम किम्?

11. ज्ञानं केन सम्बन्धेन आत्मनि तिष्ठति?

12. जलस्य रूपं किम्?

13. स्नेहस्य लक्षणं किम्?

अथवा

द्रवत्वस्य लक्षणं किम्?

14. कारणं कतिविधम्? तेषां नामानि स्पष्टयत।

अथवा

असमवायिकारणस्य लक्षणं किम्?

15. पक्षधर्मतायाः किं लक्षणम्?

16. विपक्षलक्षणं किम्?

17. किं नाम परामर्शः?

18. व्यतिरेकव्याप्तेः उदाहरणं किम्?

19. प्रमाणं कतिविधम्? नामानि लिखत।

20. स्मृतेः लक्षणं किम्?

ब. सर्वे प्रश्नाः समाधेयाः। (5×8=4

21. सपदकृत्यं पदार्थान् विभजत।

अथवा

यथाग्रन्थम् अनुमानं साधयत।

22. प्रत्यक्षप्रमाणं सपदकृत्यं प्रतिपादयत।

अथवा

हेत्वाभासं विवेचयत।

23. ग्रन्थोक्तरित्या परार्थानुमानस्य पञ्चावयवत्वं? साधयत

24. अनुभवस्य लक्षणमुदाहरणञ्च लिखत।

25. संख्यायाः किं लक्षणम्? कुत्र च सा वर्त्तते स्पष्टयत।

अथवा

तर्कस्य स्वरूपमुपस्थापयत।

स. अधोलिखितप्रश्नस्य एकं निबन्धात्मकमुत्तरं देयम्।

(1×20=20)

26. सपदकृत्यं वायोः लक्षणं लिखत।

अथवा

ग्रन्थोक्तरित्या "षड्विधसन्निकर्षः" लिखत।

अथवा

सव्यभिचारस्य लक्षणं भेदपुरस्सरं विमृशत।

अथवा

PS/UM-I/6/99A/18

षष्ठपत्रम्

जैनदर्शनम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

(तत्त्वार्थसूत्रे प्रश्नाः)

अ. सर्वे प्रश्नाः समाधेयाः। (20×2=40)

1. तत्त्वार्थसूत्रस्य अपरनाम किं प्रसिद्धम्?
2. मोक्षमार्गः किमुच्यते?
3. तत्त्वार्थसूत्रस्य कर्तुः नाम किम्?
4. तत्त्वं किमुच्यते?
5. सम्यग्दर्शनं किं कथ्यते?
6. न्यासः कः?
7. अधिगमः कथं जायते?
8. सम्यग्ज्ञानस्य भेदाः के सन्ति? नामानि लिखत।
9. मतिज्ञानं कथमुत्पद्यते?
10. क्षयोपशमनिमित्तः कतिविधः प्रोक्तः?
11. अवधिमनःपर्ययोः को भेदः उक्तः?
12. विपर्ययज्ञानानि कानि? नामानि लिखत।

13. नैगमनयः किमुच्यते?

14. जीवस्य असाधारणभावाः के सन्ति?

15. पारिणामिकभावस्य कति भेदाः भवन्ति? नामानि लिखत।

16. जीवस्य लक्षणं किं प्रोक्तम्?

अथवा

उपपादजन्म केषां भवति?

17. शरीराणि कानि? नामानि लिखत।

अथवा

देवानां निकायाः कति भवन्ति?

18. 'असंख्येयाः प्रदेशाः धर्माधर्मैकजीवानाम्' इत्यनेन किमुक्तम्?

अथवा

द्रव्यस्य किं लक्षणं प्रोक्तम्?

19. 'कालस्य' इति सूत्रेण किं तात्पर्यम्?

अथवा

'व्रतम्' किमुच्यते?

20. जीवस्य उपकारः कः प्रोक्तः?

अथवा

हिंसायाः लक्षणं किमुक्तम्?

सर्वे प्रश्नाः समाधेयाः। (5×8=40)

21. जीवस्य असाधारणभावान् संक्षेपेण विवेचयत।

22. मोक्षमार्गस्य स्वरूपं स्पष्टयत।

23. नैगमादिसप्तनयानां संक्षेपेण विवेचनं कुरुत।

अथवा

केवलज्ञानस्य स्वरूपं स्पष्टयत।

24. मतिश्रुतादिपञ्चज्ञानानि संक्षेपेण विवेचनीयानि।

अथवा

दानस्य स्वरूपं स्पष्टयत।

25. बन्धहेतवः विवेचनीयाः।

अथवा

उत्तमक्षमादिदशधर्माः लेखनीयाः।

स. कयोश्चिद् द्वयोः प्रश्नयोः उत्तरं प्रदेयम्। (2×10=20)

26. सप्ततत्त्वानि।

27. दशधर्माः।

अथवा

पञ्चव्रतानि।

अथवा

# PS/UM-I/6/99B/18

## षष्ठपत्रम्

## बौद्धदर्शनम्

समयः घण्टात्रयम् पूर्णाङ्काः 10

अ. सर्वे प्रश्नाः समाधेयाः। (20×2=40)

1. सत्यद्वयं लिखत।
2. पञ्चोपादानस्कन्धान् लिखत।

अथवा

बुद्धस्य बोधिप्राप्तिस्थानं लिखत।

3. कति रत्नानि? कानि च तानि?
4. त्रिविधा वेदना का?
5. सिद्धार्थस्य मातुः नाम किम्?
6. कति बुद्धाः? के च ते?

अथवा

सम्भारद्वयं लिखत।

7. त्रीणि यानानि कानि?
8. 'स्कन्धः' इत्यस्य पदस्य कोऽर्थः?
9. त्रीणि पिटकानि कानि?

10. पञ्च विषयान् लिखत।

11. चत्वारि सङ्ग्रहवस्तूनि कानि?

12. संज्ञा का?

अथवा

शिक्षात्रयं लिखत।

13. कति ब्रह्मविहाराः? के च ते?

14. आवरणद्वयं किम्?

15. दानं कतिविधम्? कानि च तानि?

अथवा

कति माराः? के च ते?

16. चत्वारः गन्धाः के?

17. कति बोधिपाक्षिका? धर्माः?

18. कति महापुरुषलक्षणानि?

अथवा

कति प्रवचनानि?

19. चत्वार्यार्यसत्यानि कानि?

20. त्रीणि अकुशलमूलानि कानि?

ब. सर्वे प्रश्नाः समाधेयाः। (5×8=

21. प्रतीत्यसमुत्पादस्य कति अङ्गाः? यथाग्रन्थन प्रतिपादनीयाः।

22. कति अकुशलानि? यथाग्रन्थदिशा विशदीकुरुत।

अथवा

नवाङ्गप्रवचनानि प्रतिपादनीयानि।

23. बोधिसत्त्वानां दश बलानि लिखत।

अथवा

कति अव्याकृतवस्तूनि? यथाग्रन्थनयेन स्पष्टीकुरुत।

24. कति स्प्रष्टव्यानि? यथाग्रन्थदिशा स्पष्टीकुरुत।

अथवा

द्वादशायतनानि यथाग्रन्थनयेन लिखत।

25. सप्तत्रिंशद् बोधिपाक्षिका धर्माः प्रतिपादनीयाः।

स. कश्चन एकः प्रश्नः समाधेयः। (1×20=20

26. महायानबौद्धदर्शनस्य वैशिष्ट्यम् अधीतग्रन्थदिश लेखनीयम्।

अथवा

धर्मसङ्ग्रहग्रन्थकर्तुः देशकालकृतीनां परिचयो देयः।

अथवा

आर्याष्टाङ्गिकमार्गाः विवेचनीयाः।

अथवा

# PS/UM-I/6/99C/18

## षष्ठपत्रम्

## काश्मीरशैवदर्शनम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. सर्वे प्रश्नाः समाधेयाः। (20×2=40)

1. शिवस्तोत्रावल्याः द्वितीयस्तोत्रस्य नाम किम्?
2. आचार्य अभिनवगुप्तस्य समयः कः?
3. शिवदृष्टिकारः कः?
4. मिथ्याभासः कः?
5. सिद्धिः कति विधः?
6. मातृका का?
7. अभिनवगुप्तस्य मातु नाम किम्?

अथवा

नवमशतकस्य आचार्यद्वयस्य नाम लिखत?

8. त्रिकाचारग्रन्थाः के सन्ति?

अथवा

तन्त्रसारकारः कः?

9. सोमानन्दस्य कालः कः?

10. त्रिकाचारः कः?

**अथवा**

रुद्रः कः?

11. शिवः कः?

12. शिवस्तोत्रावल्याः तृतीयस्तोत्रस्य नाम किम्?

**अथवा**

त्रिभुवनस्वामिनः के?

13. रुद्रप्रमाता कः?

14. त्रैलोक्यनाथः कः?

15. भवः कः?

**अथवा**

अख्याति इत्यस्य कोऽर्थः?

16. पशुः कः?

17. परमशिवः कः?

18. जीवन्मुक्तः कः?

19. आचार्य-उत्पलदेवस्य गुरोः नाम किम्?

20. शैवदर्शनस्य प्रकरणग्रन्थः कः?

ब. सर्वे प्रश्नाः समाधेयाः। (5×8=40)

21. नाथवेद्यक्षये केन न दृश्याऽस्येककः स्थितः।

वेद्यवेदकसक्षोभेऽप्यसि भक्तैः सुदर्शनः॥

इति व्याख्या कार्या।

अथवा

जीवन्मुक्तिस्वरूपं लिखत?

22. महादेवाय रुद्राय शङ्कराय शिवाय ते।

महेश्वरायापि नमः कस्मैचिन्मन्त्रमूर्तये॥

इति व्याख्या कार्या।

अथवा

जाग्रतस्योपरि टिप्पणी विधेया?

23. बन्धस्वरूपं वर्णयत?

24. प्रत्यभिज्ञां निरूपयत?

25. प्रभुणा भवता यस्य जातं हृदयमेलनम्।

प्राभवीणां विभूतीनां परमेकः स भाजनम्॥

इति व्याख्या कार्या।

अथवा

जडे जगति चिद्रूपः किल वेद्येऽपि वेदकः।

विभुर्मिते च येनासि तेन सर्वोत्तमो भवान्॥

इति व्याख्या कार्या।

(1×20=20)

स. एकः प्रश्न समाधेयः।

26. प्रथमस्तोत्रस्य स्वरूपं प्रतिपादयत ?

अथवा

आचार्य-अभिनवगुप्तस्य जीवनवृत्तं वर्णयत ?

अथवा

क्षेमराजस्य जीवनवृत्तं विशदयत ?